ব্যাস উবাচঃ—শৃণু বিপ্র প্রবক্ষ্যামি পিতৃস্তোত্রং মহাফলম্। পঠনীয়ং প্রযত্নেন তনয়ৈর্ভক্তিপূর্বকম্ ॥১॥ নমঃ পিত্রে জন্মদাত্রে সর্বদেবময়ায় চ। সুখদায় প্রসন্নায় সুপ্রীতায় মহাত্মনে ॥২॥ সর্বযজ্ঞ-স্বরূপায় স্বর্গায় পরমেষ্ঠিনে। সর্বতীর্থাবলোকায় করুণাসাগরায় চ ॥৩॥ পিত্রে তুভ্যং নমো নিত্যং সদারাধ্যতমাঙ্ঘ্রয়ে। বিমলজ্ঞানদাত্রে চ নমস্তে গুরবে সদা ॥৪॥ নমস্তে জীবনাধিক্যদর্শিনে সুখহেতবে। নমঃ সদাশুতোষায় শিবরূপায় তে নমঃ ॥৫॥ সদাপরাধক্ষমিণে সুখদায় সুখায় চ। দুর্লভং মানুষমিদং যেন লব্ধং ইমং বপুঃ। সম্ভাবনীয়ং ধর্মার্থে তস্মৈ পিত্রে নমো নমঃ ॥৬॥ ইদং স্তোত্রং পিতুঃ পুণ্যং য পঠেৎ প্রযতো নরঃ। প্রত্যহং প্রাতরুত্থায় পিতৃশ্রাদ্ধদিনেঽপি চ ॥৭॥ স্বজন্মদিবসে সাক্ষাৎ পিতুরগ্রে স্থিতোঽপি বা। ন তস্য দুর্লভং কিঞ্চিৎ সার্ধং জপ্যাদিবাঞ্ছিতম্ ॥৮॥ নানাপকর্ম কৃত্বাপি যঃ স্তৌতি পিতরং সুতঃ। স ধ্রুবং প্রবিধায়ৈবঃ প্রায়শ্চিত্তং সুখী ভবেৎ ॥৯॥ অকর্মণ্যস্তু যঃ স্তুয়াৎ পিতরং সুরভাবতঃ। পিতুঃ প্রীতিকরো নিত্যং সর্বকর্মান্বিতো ভবেৎ ॥১০॥